# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-शास्त्री-३** | **प्रश्नपत्रम् – ८** | **गुणाः – ७०** |
| **विषयः – पुराणेतिहासः** | **सत्रम्- ६ षष्ठम् (OLD)** | **समयः- ०८:०० तः ११:००** |
| **दिनाङ्कः – ०४/०४/२०२०** | **सन्दर्भग्रन्थः – महाभारते शान्तिपर्वणि आपद्धर्मपर्व** | |

---

प्रथमान्वितिः (Unit 1) गुणाः

**प्रश्नः १ द्वयोः पद्ययोः सप्रसङ्गं विवेचनं कुरुत।** १०

१ आभ्यन्तरे प्रकुपिते बाह्ये चोपनिपीडिते।
क्षीणे कोशे श्रुते मन्त्रे किं कार्यमवशिष्यते।।

२ कालेन क्रियते कार्यं तथैव विविधाः क्रियाः।
कालेनैते प्रवर्तन्ते कः कस्येहापराध्यति।।

३ त्रेताद्वापरयोः सन्धौ तदा दैवविधिक्रमात्।
अनावृष्टिरभूद् घोरा लोके द्वादशवार्षिकी।।

**प्रश्नः २ भारद्वाजकणिकयोः कूटनीत्या उपदेशवर्णनं यथा ग्रन्थं लिखत।** १०

अथवा

**बिडालमूषकाख्यानं विवेचयत।**

द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ द्वयोः पद्ययोः सप्रसङ्गं विवेचनं कुरुत।** १०

१ शरणागतस्य कर्तव्यमातिथ्यं हि प्रयत्नतः।
पञ्चयज्ञप्रवृत्तेन छायां नोपसंहरते द्रुमः।

२ पापं कृत्वाभिमन्येत नाहमस्मीति पूरुषः।
तच्चिकीर्षति कल्याणं श्रद्दधानोऽनसूयकः।।

३ प्रदीप्ताः पुत्रशोकेन संनिवर्तत मानुषाः।
श्रुत्वा गृध्रस्य वचनं पापस्येहाकृतात्मनः।।

**प्रश्नः ४ कपोतद्वारा अतिथिसत्कारवर्णनं कुरुत।** १०

अथवा

**तपसः महिमानं यथाग्रन्थं विवेचयत।**

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ एकं पद्यं सप्रसङ्गं लिखत।** **१०**

१ महानयं धर्मपथो बहुशाखश्च भारत।
किंस्विदेवेह धर्माणामनुष्ठेयतमं मतम्।।

२ पितामह महाप्राज्ञ कुरुणां प्रतिवर्धन।
प्रश्नं कश्चित् प्रवक्ष्यामि तन्मे व्याख्यातुमर्हसि।।

३ क ते निवासः कल्याण किं गोत्रा ब्राह्मणी च ते।
तत्वं ब्रूहि न भीः कार्या विश्वसस्व यथासुखम्।।

**प्रश्नः ६ नृशंसपुरुषाणां लक्षणं सविशदं वर्णयत।** **१०**

**अथवा**

**गौतमद्वारा राजधर्मवधं यथाग्रन्थं विवेचयत।**

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ दशप्रश्नानां लघूत्तरं लिखत।** **१०**

१ महाभारते कति पर्वाणि सन्ति?

२ महाभारतस्य रचयिता कः?

३ कस्मिन् अध्याये ब्रह्मदत्तपूजन्योः संवादोऽस्ति?

४ आपद्धर्मपर्व कस्मिन्  पर्वणि अस्ति?

५ भार्याप्रशंसां कः करोति?

६ समस्तानर्थानां कारणं किम्?

७ पूजनी का आसीत्?

८ युधिष्ठिरस्य पितुः नाम किम्?

९ कः विश्वामित्रः?

१० जनमेजयस्य पिता कः?

११ मृगस्य अन्वेषणं कः करोति?

१२ पितामहः नाम कः?

१३ अमात्यः इत्यस्य कोऽर्थः?

१४ कामक्रोधादि कति दोषाः सन्ति?

१५ कृतघ्नः शब्दस्य कोऽर्थः?

**************************